# Vivekananda darshanam

# વિવેકાનન્દ-દર્શનમ્

## Document Information

Text title : Vivekananda Darshanam

File name : vivekAnandadarshanam.itx

Category : vishhnu, pradIptakumArananda, krishna

Location : doc_vishhnu

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : January 14, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

Vivekananda darshanam

# વિવેકાનન્દ-દર્શનમ્

લેખકઃ - નન્દપ્રદીપકુમારઃ

વેદાન્તાનન્દસન્દોહરામકૃષ્ણમહાત્મનઃ ।
નમોઽસ્તુ પ્રિયશિષ્યાય વિવેકાનન્દયોગિને ॥

શ્રીમત્પરિવ્રાજકાચાર્યો વિવેકાનન્દો મહાન્ દાર્શનિકો બભૂવ । ૧૮૬૩ ઈસવીયે જાનુઆરી માસસ્ય દ્વાદશ દિવસે સોમવાસરે પ્રાતઃ ઊનપઞ્ચાશદધિકે ષટ્ વાદને મકરસંક્રાન્ત્યાં તિથૌ કલિકતા-નગર્યાં વિશ્વનાથ દત્તસ્ય પિતૃભવને અયં મહાત્મા જન્મ લેભે (૧) । વિશ્વેશર- શિવ-કરુણયા પુત્રોઽયં જાતઃ ઇતિ મનસિ કૃત્વા જનની ભુવનેશ્વરી પુત્રં વીરેશ્વરનામાલંકૃતં કૃતવતી (૨) । અન્નપ્રાશનસમયે શિશોર્નામ નરેન્દ્રનાથ (૩) સંજાતઃ । તત્પશ્ચાત્ સન્યાસી વિવેકાનન્દઃ ।

એકદા સિમુલિઆપલ્લી નિવાસિ-શ્રીસુરેન્દ્રનાથ-મિત્ર-મહોદયસ્ય ગૃહે શ્રીરામકૃષ્ણેન (૪) સહ નરેન્દ્રનાથસ્ય સાક્ષાત્કારઃ સમજનિ । શ્રીરામકૃષ્ણસ્ય શિક્ષાપદ્ધતિરાસીદનુપમાઽભિનવા ચ । સ શિષ્યાણાં ભાવધારાં પાલયન્ તદીયજીવનપૂર્ણતામસાધયત્ । કસ્યાપિ ભાવમીષદપિ નાશયિતું નાચેષ્ટત । નરેન્દ્રમસૌ સર્વોચ્ચમધિકારિણમવાગચ્છત્ । તથાપરેદ્યુઃ મહદાકર્ષણમ્ । શ્રીરામકૃષ્ણં ગુરુરૂપેણ સ્વીચકાર સઃ । અદ્વૈતં બ્રહ્મજ્ઞાનમેવ સર્વાભ્યર્હિતં જ્ઞાનમ્ । સાધનાદિભિઃ વેદાન્તસત્યં પ્રત્યક્ષીકૃત્ય કાલાન્તરે મહાચાર્યો બભૂવ । નાસ્માકં દેશે અપિતુ નૈકેષુ દેશેષુ પરિભ્રમ્ય સ્વકીય-વક્તૃતામાધ્યમેન શિકાગો (૫) નગરે ભારતીયસંસ્કૃતેઃ સ્વાભિમાનં બર્દ્ધયામાસ । સ્વામિવિવેકાનન્દઃ ન કસ્યાપિ ધર્મસ્ય નિન્દાં સમાલોચનાં વા કૃતવાન્ । કમપિ ધર્મં ન હીનમમન્યત્ । સર્વદા તેનોક્તમ્, સ એવ ધર્મો યમનન્તં ભગવદ્વિષયમુપદેક્ષ્યતિ,સ એવ તાદૃશોઽનન્ત એવ ભવિષ્યતિ । સ એવ ધર્મસૂર્યઃ કૃષ્ણભક્તં પ્રતિ, ખ્રિસ્તધર્મં પ્રતિ, સાધુમ્ અસાધું વા પ્રતિ, સર્વાન્ પ્રતિ સમભાવેન તુલ્યં કિરણજાલં પ્રસારયિષ્યતિ । અસૌ ધર્મઃ કેવલો બ્રાહ્મણ્યધર્મઃ બૌદ્ધધર્મઃ ખ્રિસ્તધર્મઃ મુસ્લિમ ધર્મો વા ન ભવિષ્યતિ કિન્તુ સર્વેષામેવ ધર્માણાં સમષ્ટિરૂપો ભવિતા । તસ્મિન્નેવ ધર્મે ઉન્નતેરનન્તપથો મુક્ત એવ સ્થાસ્યતિ । અસૌ સાર્વભૌમો ધર્મઃ । સર્વસ્મિન્ ધર્મે ઈશ્વરો વિદ્યતે ઇતિ વિવેકાનન્દસ્ય મહાન્ ઉપદેશઃ સંકલિતઃ । (૬)

બદ્ધ-જીવાનાં કૃતે તસ્ય મહતી અભિપ્સા આસીત્ । સર્વે મુક્તા ભવન્તુ, સુખિનો ભવન્તુ, સર્વેષાં મોક્ષપ્રાપ્તિર્ભવતુ ઇતિ ચિન્તયન્ અમેરિકાયાં વક્તૃતાપ્રસંગે તેન વિશ્વશાન્તયે સમષ્ટિબ્રહ્મ ઉત્થાપિતમ્ । યચ્ચોક્તં- યત્ખલુ હિન્દુ-જાતીયાનાં વેદાન્તવાદીનાં બ્રહ્મ, બૌદ્ધાનાં બુદ્ધઃ, જૈનાનાં જિનઃ, ઇસ્લામિનાં અલ્લા,ખ્રિસ્ત્રિયાનાં યિશુઃ, યહુદીનાં જિહોવા રૂપેણ પરિગણ્યન્તે પરિપૂજ્યન્તે, અધુના સ એવ સમન્વયેશ્વરો ભગવાન્ અસ્માકં મહદુદ્દેશ્યં સફલયિતું

શક્તિ વો પ્રદદાતુ । (૭) ઇતિ સર્વધર્મસમન્વય વાણી તત્રોપસ્થિતાનાં પાશ્ચાત્યજનાનાં હૃદયમાન્દોલીકૃતા ।

ઉન્નતિસાધનં ધર્મઃ, અવનતિસાધનમધર્મ ઇતિ ધર્મસ્ય સંજ્ઞા તેન નિરૂપિતા । યઃ પશું મનુષ્યઃ મનુષ્યં ચ દેવતાં નિર્માતિ સ એવ ધર્મઃ સાર્વભૌમઃ । પશુત્વ-મનુષ્યત્વ-દેવત્વગુણૈઃ સમ્મિલિતો માનવદેહઃ । પશુત્વં વિહાય મનુષ્યત્વે,મનુષ્યત્વં ચ વિહાય દેવત્વેઽવસાનં ધર્મઃ । તદ્વિપરીતમધર્મઃ । અત્ર સર્વેષાં મંગલવિધાનં ધર્મઃ । દ્વેષો પાપઃ । ઈશ્વરે પરમાત્મનિ અખણ્ડવિશ્વાસો ધર્મઃ,અન્યાર્થેન સત્કાર્યે સ્વાધીનો ધર્મઃ પરાધીનં પાપમ્ । આત્મોદ્ધાર-પરોપકારૌ સાર્વકાલિકૌ । અન્યથા અસ્થિ-માંસભારેણ દેહેન કો લાભઃ? (૮) અનન્તશાન્તિમત્વં હિ ધર્મલક્ષણમ્ । ધર્મસ્ય ગુપ્તતથ્યં મતવાદે નાસ્તિ અભ્યાસે વર્તતે । મનુષ્યં નિકષા શાન્તિરાગમનં હિ ધર્મસ્યાભ્યુદયઃ ।

મનુષ્યઃ વૃત્તાકારઃ, યસ્ય પરિધિર્નાસ્તિ । યઃ કેન્દ્રઃ સ ભગવાન્ । પરમાત્મા વ્યાપકઃ । શિવજ્ઞાને જીવસેવા ભગવત્પૂજા । યદિ માનવાનાં સેવા ન ભવેત્ તર્હિ દેવારાધનં વૃથા । યે અહર્નિશં દરીદ્ર-નિર્બલ-રુગ્ણાનાં સેવાં સ્વીકરોતિ વસ્તુતઃ સ શિવપૂજકઃ । (૯)

વેદાન્તશાસ્ત્રસ્ય પરમાચાર્યઃ સ્વામિ વિવેકાનન્દઃ જ્ઞાન-કર્મભક્તીનાં સમન્વય વિગ્રહ આસીત્ । પાશ્ચાત્યદેશેષુ વેદાન્તપ્રચારસ્ય અશ્રુતપૂર્વં સાફલ્યમવાપ્ય પૂજ્યપાદ વિવેકાનન્દઃ આગ્લશિષ્યૈઃ સહ ભારતં પ્રત્યાગતઃ । નર નારાયણ સેવા પ્રસંગે તેન ભણિતમ્- શિવસ્ય પૂજા કેવલં મન્દિરે વિગ્રહસ્યાર્ચ્ચનં નહિ પ્રત્યુત દીન દરિદ્રેષુ તથા આતુરેષુ યઃ જીવરૂપઃ શિવોઽસ્તિ તસ્યૈવ પૂજા અસ્તિ ।(૧૦)

વિવેકાનન્દનયે ધર્મ એવ ભારતસ્ય મેરુદણ્ડઃ । રાજનીતિઃ અન્યો વા ન કોઽપિ । યદિ કદાચિત્ ભારતીયાનાં કૃતે જડવાદસ્ય આવશ્યકતા વર્તતે તર્હિ સાહસિકતાયા આવશ્યકતા વિદ્યતે । સાહસાવલમ્બનં કર્તું નિર્દેશં કુર્વન્ આહ વિવેકાનન્દઃ- જગતિ યદિ કિમપિ પાપમસ્તિ તદ્ દૌર્બલ્યમેવ । સર્વવિધાં દુર્બલતાં પરિત્યજત । દુર્બલતૈવ મૃત્યુઃ, દુર્બલતૈવ પાપમસ્તિ । (૧૧) ઇતિ ।

૧૮૯૭ ઈસવીયે વિવેકાનન્દઃ “રામકૃષ્ણ મિશન” નામ્ના સંઘઃ સંસ્થાપિતઃ । અસ્ય કતિચન નિયમાઃ સમુલ્લિખિતાઃ । તે વક્ષમાણાઃ નિર્દિષ્ટાઃ ।

સંઘસ્યોદ્દેશ્યં જનતાયાઃ સેવા, તથા આત્મિકં કલ્યાણ-સાધનમ્ । રાજનીત્યા સહ અસ્ય સંઘસ્ય ન કોઽપિ સમ્બન્ધો વર્ત્તતે ।

મનુષ્યજાતેઃ કલ્યાણાય વેદાન્ત સત્યસ્ય પ્રચારં સર્વસાધારણસ્ય ઐહિક-પારલૌકિક કલ્યાણસ્ય કૃતે તત્ત્વાનાં કાર્યરૂપેણ પરિણમનમસ્ય પરમો મન્ત્રઃ । બહુજન હિતાય બહુજન સુખાય “રામકૃષ્ણ મિશનઃ” સંચાલિત તેન સભાપતિના વિવેકાનન્દેન । (૧૨)

વિવેકાનન્દ દર્શનમલૌકિકમ્ । “આત્મનો મોક્ષાર્થં” “જગદ્ હિતાય ચ” ઇતિ આદર્શયુગલં મનસિ નિધાય જીવમાત્રે ભગવતોઽભિવ્યક્તિં સ્વીકાર્ય જીવમાત્રસ્ય સેવા કરણેન ભગવતો પૂજા ભવતિ ઇતિ આદર્શસ્તસ્ય સર્વદા બલવત્તર આસીત્ । નર નારાયણ સેવયા હિ આત્માનુભૂતિર્જાયતે નાન્યથા ઇતિ । (૧૩)

દાનધર્મમહિમા વિવેકાનન્દદર્શને પ્રતિફલિતા । "દાનમેકં કલૌ યુગે" ઇતિ મહાવાક્યમવિસ્મરન્ તેન ભણિતમ્ - ચિત્તશુદ્ધેરુપાયભૂતં દાનં સર્વાદૌ કર્તવ્યમ્ । અનેન સેવાધર્મસ્ય પ્રત્યક્ષતા પ્રમાણીક્રિયતે । ધર્મદાન-વિદ્યાદાન-પ્રાણદાનમન્નદાનાદીનાં ચતુર્વિધાનાં મધ્યે ધર્મપ્રાર્થિને ધર્મોપદેશદાનં, વિદ્યાવિહીનાય વિદ્યાદાનં, રુગ્ણાનાં મુમૂર્ષૂણાં ઔષધદાનં સેવયા ચ તજ્જીવનરક્ષણં, ક્ષુધાતુરેભ્ય અન્નદાનઞ્ચ મહાદાનેષુ અન્તર્ભુક્તા ભવન્તિ । ઇદં ચતુર્વિધં ભગવત્સેવાબુદ્ધ્યા કરણીયમિતિ પ્રતીયતે । વિવેકાનન્દ પ્રવર્તિતે અસ્મિન્ સેવાધર્મે વૈયક્તિકે પારિવારિકે ધાર્મિકે સામાજિકે રાષ્ટ્રિયે તથા આન્તર્જાતિકે જીવને ચ સુદૂરપ્રસારી ફલસ્ય વિપુલ સમ્ભાવના વિદ્યતે । જગતિ યાનિ ધર્મમતાનિ તાનિ અખણ્ડ-સનાતન-ધર્મસ્યાંગીભૂતાનિ ઇત્યેવં મન્યમાનાનાં સર્વધર્માવલમ્બિનાં મધ્યે ભ્રાતૃભાવસ્થાપનાય ગુરુપાદેન પરમહંસદેવેન યાનિ કાર્યાણિ કૃતાનિ તેષામવધારણં પરિચાલનં ચાસ્ય શ્રીરામકૃષ્ણસંઘસ્ય મહાવ્રતમ્ । (૧૪)

સાધારણજનેભ્યઃ જાગતિક-પારમાર્થિક-કલ્યાણવિધાયક-વિજ્ઞાન ધર્મશિક્ષાદાનં, શિક્ષાકલાપ્રભૃતીનામુન્નતિસાધનં, વેદાન્તો ધર્મભાવાન્તરાણિ ચ યથા શ્રીરામકૃષ્ણજીવને સંઘટિનાનિ જનસમાજે તેષાં પ્રવર્તનમેકાન્તતઃ કામ્યમિતિ હેતોઃ કર્મિસંગ્રહઃ તેભ્યઃ શિક્ષાદાનં ચ સંઘસ્ય આદર્શત્વેન વર્ણિતઃ । (૧૫)

સ્વામિ વિવેકાનન્દઃ નૈકે મઠાઃ પ્રતિષ્ઠિતાઃ । ભારતે વેલુરમઠઃ (૧૬) સારદા મઠશ્ચ । પાશ્ચાત્યે આલમોડાતઃ પઞ્ચવિંશતિ ક્રોશદૂરવર્તિનિ માયાવતી નામકે સ્થાને તુષારમૌલિ હિમાચલસ્ય નિર્જનાભ્યન્તરે અદ્વૈતાશ્રમનામકો મઠશ્ચ સંસ્થાપિતઃ । અત્ર પ્રાચ્ય-પાશ્ચાત્યભક્તાઃ સમ્મિલિતાઃ સન્તઃ પરસ્પર ભાવવિનિમય માધ્યમેન ઉપકૃતાઃ સન્તિ । અત્ર સર્વધર્માવલમ્બિનઃ સર્વમતાનુસારિણશ્ચ સ્વ સ્વ-ધર્મમત-વિશ્વાસાનુસારેણ અસ્મિન્ સ્થાને એકત્રીભવિતું સમર્થા ભવન્તિ । અત્ર કાચન મૂર્તિરપિ નાસ્તિ ।

વિવેકાનન્દઃ સર્વદર્શનનિષ્ણાતઃ સત્યદ્રષ્ટા ઋષિ આસીત્ । તન્મતં તલ્લિખિતપત્રેપિ સુસ્પષ્ટમ્ । તથા હિ- વયં માનવાન્ ઇદૃશં સ્થાનં નેતુમિચ્છામઃ, યત્ર વેદા ન સન્તિ, બાઇવેલં નાસ્તિ, કોરાણમપિ નાસ્તિ, તથાપિ આદર્શ સ્વરૂપે તત્ર સ્થાને ગન્તવ્યે સતિ વેદ-વાઇબેલ-કોરાણાનાં સમાવેશો જાયતે । એષા શિક્ષા માનવાસ્તુ શિક્ષણીયા એવ । યત્ર નાના ધર્માઃ એકમેવાદ્વિતીયસ્ય શાશ્વતાધ્યાત્મિક-સત્યસ્ય વિભિન્નતાં સ્વીકુર્વન્તિ । તત્ર તસ્યૈવ પરમ-સત્યસ્ય નામ એકતા સમન્વયતા વેતિ ગીયતે । (૧૭)

વિવેકાનન્દઃ ભક્તિપથં સમર્થિતવાન્ । સર્વેષાં પૂર્વાચાર્યાણાં નારદ-શાણ્ડિલ્યાદીનાં (૧૮) મતાનિ તેન વ્યાખ્યાતાનિ । યદિવા જ્ઞાન-ભક્તિ-ઉપદેષ્ટૃણાં મધ્યે પારસ્પરિક-સામાન્યભેદઃ પરિલક્ષ્યતે તથાપિ ઉભયોર્મધ્યે સુપ્તરૂપેણ ભક્તિબીજમાસ્તે । (૧૯) "તમેવ ભાન્તમનુભાતિ સર્વં તસ્ય ભાષા સર્વમિદં વિભાતિ" (૨૦) અત્ર અનિર્વચનીયં પ્રેમ પરાભક્તેઃ સહાયકમિતિ નિર્દિષ્ટમ્ । વૈરાગ્યાત્ હિ પરાભક્તિરુદેતિ નાન્યથા ।

વેદાન્તસ્ય પરમાચાર્યઃ સ્વામિવિવેકાનન્દઃ સમન્વયવાદી આસીત્ । ઈશ્વરસ્વરૂપં તુ "જન્માદ્યસ્ય યતઃ" (૨૧) "ક્લેશકર્મવિપાકાશયૈરપરામૃષ્ટઃ પુરુષવિશેષ" એવ (૨૨) "સ અનિર્વચનીય પ્રેમસ્વરૂપ" (૨૩) ઇત્યાદિભિઃ સર્વમતં સમર્થિતં મહાનુભાવેન ।

સ્વામિવિવેકાનન્દઃ પ્રાચ્ય-પ્રતીચ્યયોઃ સમ્મિલન સેતુ-સ્વરૂપ આસીત્ । સ સમસ્તે સંસારે સામ્ય-મૈત્ર્યોઃ સ્થાપનસ્ય ગુરુદાયિત્વં નિજસ્કન્ધે ગૃહીતવાન્ । તસ્યૈયં શુભા પ્રચેષ્ટા કિયદ્દૂરં સફલા ભૂતા ઇતિ ઇતિહાસઃ પ્રમાણયિષ્યતિ । ૧૯૦૨ ખ્રિસ્તાબ્દે જુલાઇ માસસ્ય ચતુર્થ દિનાંકે અસૌ મહાત્મા મહાસમાધિસ્થો બભૂવ ।

સહાયક ગ્રન્થાઃ
૧-યુગાચાર્યઃ વિવેકાનન્દઃ-સ્વામિ અપૂર્વાનન્દઃ
૨-શ્રીશ્રીવિવેકાનન્દ ચરિતમ્-યતીન્દ્ર વિમલ ચતુર્ધરી
૩-ભક્તિયોગ સ્વામી વિવેકાનન્દ -રામકૃષ્ણ મઠ (ઓડિઆ)
૪-વિવેકાનન્દ વિચારધારા- સૌરીબન્ધુ કર (ઓડિઆ)
૫-સ્વામી વિવેકાનન્દ- સ્વામી જગન્નાથાનન્દ (ઓડિઆ)
૬-સ્વામી વિવેકાનન્દ-સૌરીબન્ધુ કર (ઓડિઆ)
૭-સ્વામી વિવેકાનન્દ- પ્રેમચાન્દ
૮-સ્વામી વિવેકાનન્દઙ્ક બાણી ઓ રચના- સ્વામી આત્મપ્રભાનન્દ-રામકૃષ્ણ મઠ ભુવનેશ્વર (ઓડિઆ)
૯-વિવેકાનન્દ ચરિત-સત્યેન્દ્રનાથ મજૂમદાર (ઓડિઆ)
૧૦-Bibekananda, A Biography - by Swami Nikhilananda

પાદટિપ્પણ્યઃ-

(૧) He was born at 6;49 AM, a few minutes after sunrise, on Monday January 12 1863, It was the day of the great Hindu festival Makarsankranti.- Vivekananda A Biography page-1

(૨) યુગાચાર્યઃ વિવેકાનન્દઃ, પૃષ્ઠ-૯

(૩) તત્ર-પૃષ્ઠ-૯

(૪) Ramakrishna, the God man of modern times, was born on February 18, 1836 in the little villege of Kamarpukur, in the district of Hooghly in Bengal. Vivekananda A Biography page-9

(૫) ૧૮૯૩ ખ્રિસ્તાબ્દે અમેરિકાયાં સંજાતઃ

(૬) તત્ર પૃષ્ઠ-૨૦૩

(૭) તત્રૈવ પૃષ્ઠ-૨૦૩

(૮) સ્વામી વિવેકાનન્દ-સૌરીબન્ધુ કર-પપૃષ્ઠ-૧૩૭

(૯) તત્ર-પૃષ્ઠ ૧૩૭

(૧૦) તત્રૈવ પૃષ્ઠ-૨૩૮

(૧૧) તત્રૈવ પૃષ્ઠ-૨૫૦

(૧૨) વિવેકાનન્દ ચરિત્ર-૨૧૪

(૧૩) તત્ર ૨૬૬

(૧૪) તત્ર-૨૬૭

(૧૫) સ્વામી વિવેકાનન્દ - પૃષ્ઠ ૪૦૫

(૧૬) ૧૮૯૮ ખ્રિસ્તાબ્દે સંસ્થાપિતઃ

(૧૭) વિવિકાનન્દ વિચાર ધારા, પૃષ્ઠ-૭૦

(૧૮) સા પરમપ્રેમરૂપા નારદભક્તિસૂત્ર ૧

(૧૯) સ્વામી વિવેકાનન્દ વા-૮

(૨૦) કઠોપનિષત્-૨/૨/૧૫

(૨૧) બ્રહ્મસૂત્ર-૧/૧/૨

(૨૨) પાતઞ્જલી યોગસુત્ર-૨/૨૫-૨૬

(૨૩) શાણ્ડિલ્યભક્તિસૂત્ર

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

*Vivekananda darshanam*

pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*